१। **श्रीमद्भगवद्गीतानुसारं आत्मनः स्वरूपं कर्म च वर्णनीयम्।**

अत् + मनिन् = आत्मा। अतति सन्ततभावेन जाग्रदादिसर्वावस्थासु अनुवर्तते इति आत्मा। अत्धातोरर्थः— 'अत सातत्यगमने'। यः सर्वत्र समभावेन स्थितः सन् सर्वभूतेषु वर्तमानः स एव आत्मा—

*स सर्वगः सर्वशरीरभृच्च स विश्वकर्मा स च विश्वरूपः।*

*स चेतनाधातुरतीन्द्रियश्च स नित्ययुक् सानुशयः स एव।।*

अयञ्च आत्मा पाञ्चभौतिके जीवशरीरे अवस्थितः। जीवशरीरे इन्द्रियाणि, मनः बुद्धिश्च अवस्थिता। जीवस्य पार्थिवशरीरं स्थूलशरीरम्। अस्मिन् स्थूलशरीरे चक्षुःप्रभृतीनि ज्ञानेन्द्रियानि, वाक्प्रभृतीणि कर्मेन्द्रियाणि प्रत्यक्षाणि किन्तु मनः अप्रत्यक्षं तथा सूक्ष्मम्। इन्द्रियाणि स्थूलशरीरं परिचालयन्ति। अथ स्थूलदेहात् इन्द्रियाणि श्रेष्ठतराणि— *इन्द्रियाणि पराण्याहुः*। इन्द्रियम्— 'इन्द्रस्य आत्मनः लिङ्गम् अनुमापकम्। इन्द्रियं ज्ञानकर्म साधनम्। इन्द्रियाणि एकादशसंख्यकाणि— पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनश्च। मनः इन्द्रियाणां नियामकम्। अथ इन्द्रियेभ्यः मनः प्रधानतमम्।

अस्मात् मनसः पुनः बुद्धिः श्रेष्ठा। बुद्धिः हि प्रज्ञा। बुद्धिः निश्चयात्मिका अन्तःकरणवृत्तिः। ब्रह्मवैवर्त पुराणे बुद्धिः ज्ञानजननीरूपेण वर्णिता— 'बुद्धिर्विवेचना रूपा सा ज्ञानजननी'। बुद्धिः सात्त्विकी राजसी तामसी इति त्रिधा विभज्यते। तासु सात्तिकी बुद्धिः—

*प्रवृत्तिञ्च निवृत्तिञ्च कार्याकार्ये भयाभये।*

*बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी।।*

सात्त्विक्या बुद्धया केवलं कार्यम् अकार्यं भयम् अभयं बन्धं मोक्षञ्च

यथायथं ज्ञायते। परन्तु राजसिक्या बुद्ध्या धर्मम्-अधर्मम्, कार्यम्-अकार्यञ्च यथार्थतः न ज्ञायते। तथा च तामसी बुद्धिः अधर्मं धर्मरूपेण अकार्यम् कार्यरूपेण प्रकाशयति। सात्त्विकी बुद्धिः शुश्रूषा-श्रवण-ग्रहण-धारण-ऊहोपोह-अर्थविज्ञान-तत्त्वज्ञानैः गुणैः युक्ता। इयं सप्तगुणयुक्ता निश्चयात्मिका सात्त्विकी बुद्धिः मनसः श्रेष्ठा। श्रेष्ठतरायाः सात्त्विकीबुद्धेः पुनः यः श्रेष्ठः स एव आत्मा। आत्मनः महत्त्वप्रतिपादनावसरे कठोपनिषदि उक्तम्—

*इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।*

*मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः।।*

आत्मा एव पुरुषः। आत्मनः पुरुषात् वा न कोऽपि श्रेष्ठः—

*'पुरुषान्न परं किञ्चित् सा काष्ठा परा गतिः'।*

अयं पुरुषः जीवात्मा वा परमात्मनः अंशः। आत्मा द्विविधः—परमात्मा जीवात्मा चेति। परमात्मा एकः अभिन्नरेव। किन्तु जीवात्मा प्रतिदेहेषु भिन्नः। सर्वे च जीवाः परमात्मनः अंशभूताः—

*'ममैवांशो जीवलोके जीवभूतः सनातनः'।*

सर्वे च मनुष्याः ईश्वरस्य अंशाः। 'एकोऽहं बहु स्याम् प्रजायेय'—अहमेको, बहु भवामि इति परमात्मनः इच्छायाः प्रकाशः एव जीवलोकः। आधुनिककविना अपि उक्तः— मनुष्येषु कश्चित् भेदः नास्ति, सर्वं जगत् ब्रह्ममयम्।

परमात्मा ब्रह्मणः वाचकशब्दः। परमात्मा जीवात्मारूपेण जीवलोकं जीवदेहम् आश्रयते। जीवशरीरं स्थूल-सूक्ष्म-कारणभेदेन त्रिविधम्। परमात्मा कारण शरीरम्, इन्द्रिय-बुद्धि-पञ्चप्राणाः सूक्ष्म शरीरम्। जीवशरीरं स्थूलम्। परमात्मा सूक्ष्मस्थूलशरीरेण सह सम्बन्धितः सन् उत्पत्ति-स्थिति-पालनकार्यं साधयति—

*मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्।*
*सम्भवः सर्वभूतानां ततो भवति भारत।।*

परमात्मा जीवात्मरूपेण 'प्रकृतिस्थानि' तथा पञ्चज्ञानेन्द्रियैः मनसा च सह विषयभोगे प्रवर्तितः भवति। पञ्चज्ञानेन्द्रियैः सह पञ्चकर्मेन्द्रियाणां पञ्चप्राणानामपि ग्रहणमत्र विवक्षितम्।

कर्णचक्षुत्वक्जिह्वानासिकानां ज्ञानेन्द्रियाणां विषयाः यथाक्रमं शब्दस्पर्शरूपरसगन्धाश्च। इन्द्रियाणां स्वेषां विषयभोगे अधिकारः नास्ति। इन्द्रियाणि मनसा सह बिषयभोगेषु प्रवर्तन्ते।

जीवात्मा स्वरूपतः मुक्तः। तथापि स अहङ्कार-ममत्व-वासनायुक्तः सन् प्रकृत्या तथा तस्य कार्येण सह युक्तः भवति, विषयान् च भुङ्क्ते।

*पुरुषः प्रकृतिस्थो हि भूङ्क्ते प्रकृतिजान् गुणान्।*
*कारणं गुणसङ्गोऽस्य सदसद्योनि जन्मसु।।*

कठोपनिषदि अपि उक्तम्—

*'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मणीषिणः'।*